मिश्रांदू

C 21

14 leaves

21/442

25 7 X 9 cents

28 pp

~~No. 44~~
21

4

ई[illegible]विनापूर्वस्मे चयमोनिऋतिमेरुव
[illegible]णान स्यपुवेराग्नि: वरुणास्तुइतिक्रम:
[illegible] स्यकारेशान्देर्निऋतिस्तुतर:
[illegible]म रुमग्निस्यवामे शानस्चवाहुणात
[illegible]त्सुकारेश्व[illegible]णानिऋमुत्तर:
[illegible]शान[illegible]वायव्यपूर्वच
[illegible]पूर्व[illegible]त्सेकारेणावरुणोशानयाम्यात:
[illegible]पद[illegible]मेरुन्व

भाद्रगर्तु ... ।न्हूर्ळौ।। थृंरससौघ ...
करणादिसुवारोषनाशति

४४

ॐ शांभवि ५३

L00

॥अथशिक्षा॥

नद्भ्गो शङ्कुरस्सप्रस्तां ...न

१

श्रीगणेशाय नमः॥ ॐ रम्। अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा॥ शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः॥ प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः॥ पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिं॥ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः॥ प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा॥ स्वरा विंशतिरेकश्च स्पर्शानां पंचविंशतिः॥ यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥ अनुस्वारो विसर्गश्च ≍क ≍पौ चापि पराश्रितौ॥ दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च॥ १॥ आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया॥ मनः कायाग्निमाहंति स प्रेरयति मारुतं॥ मारुतस्तूरसि चरन्मंद्रं जनयति स्वरं॥ प्रातःसवनयोगं तं छंदोगायत्रमाश्रितं॥ कंठे माध्यंदिनयुगं मध्यमं त्रैष्टुभानुगं॥ तारं तार्तीयसवनं शीर्षण्यं जागतानुगं॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः॥ वर्णाञ्जनयते तेषां विभागः पंचधा स्मृतः॥ स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः॥ इति वर्णविदः प्राहुर्निपुणं तं निबोधत॥ २॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वराः स्मृताः॥ ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि॥ उदात्ते निषादगांधारावनुदात्ते ऋषभधैवतौ॥ स्वरितप्रभवा ह्येते षड्जमध्यमपंचमाः॥ अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा॥ जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च॥ ओभावश्च विवृत्तिश्च शषसा रेफ एव च॥ जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥ यद्योभावप्रसंधानमुकारादि परं ... स्वरांतं ताद्दृशादि ... ॥ ३॥ हकारं पंचमैर्युक्तमंतस्थाभिश्च संयुतं॥ उरस्यं तं विजानीयात्कंठ्यमाहुरसंयुतं॥ कंठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू॥

औ०

कंपी तथा लिखितपाठकः॥ अनर्थज्ञोल्पकंठश्च षडेते पाठकाधमाः॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः॥ धैर्यं लयसमर्थं च षडे
ते पाठका गुणाः॥ शंकितं भीतमुद्घुष्टमव्यक्तमनुनासिकं॥ काकस्वरं शिरसिगतं तथा स्थानविवर्जितं॥ उपांशु दष्टं त्वरितं निरस्तं वि
लंबितं गद्गदितं प्रगीतं॥ निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यं॥ प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोप
मेन॥ मध्यंदिने कंठगतेन चैव चक्राह्वसंकूजितसंनिभेन॥ तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यं॥ मयूरहंसान्यभृ
ना तःस्वराणां तुल्येन नादेन शिरःस्थितेन॥ ७॥ अचोस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः॥ शेषाः स्पृष्टा हलः प्रोक्ता निबोधानु
भ ६ प्रदानतः॥ यमोनुनासिका न ह्रौ नादिनो हझषः स्मृताः॥ ईषन्नादा यणो जशः श्वासिनस्तु खफादयः॥ ईषच्छ्वासांश्चरो विद्याद्गो नां भ्य
भ र्धामैतत्प्रचक्षते॥ दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि॥ छंदः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते॥ ज्योतिषामयनं चक्षु
र्निरुक्तं श्रोत्रमुच्यते॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं॥ तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते॥ ८॥ उदात्तमाख्याति
वृषोंगुलीनां प्रदेशिनीमूलनिविष्टमूर्धा॥ उपांतमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव॥ उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्य
तोंगुलिं॥ निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकां॥ अंतोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितं॥ मध्योदात्तं स्वरितं द्व्यु
दात्तं त्र्युदात्तमिति नवपदशय्या॥ अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिंद्राबृहस्पती॥ अग्निरित्यंतोदात्तं सोम इत्याद्यु
दात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितं॥ हविषां मध्योदात्तं स्वरिति स्वरितं॥ बृहस्पतिरिति द्व्युदात्तमिंद्राबृहस्पती इति त्र्युदात्तं॥

स्युर्मूर्धन्या ऋटुरषा दंत्या ऌतुलसास्स्मृताः॥ जिह्वामूले तु कुः प्रोक्तो दंत्योष्ठ्यो वस्स्मृतो बुधैः॥ ए ऐ तु कंठतालव्या ओ औ
२ ठो जो कंठोष्ठजौ स्मृतौ॥ अर्द्धमात्रा तु कंठ्यास्यादेकारैकारयोर्भवेत॥ ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतं॥ संवृतं मात्रि त २
कं ज्ञेयं विवृतं तु द्विमात्रिकं॥ घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः॥ ४॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृ
णं ४ तं॥ तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च॥ अनुस्वारयमानां च नासिका स्थानमुच्यते॥ अयोगवाहा विज्ञेया आश्र
गः ५ यस्थानभागिनः॥ अलाबुवीणानिर्घोषो दंतमूल्यस्वरानुगः॥ अनुस्वारस्तु कर्त्तव्यो नित्यं ह्रोः शषसेषु च॥ अनुस्वारे
न्य ६ विवृत्त्यां तु विरामे चाक्षरद्वये॥ द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः॥ व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीड
येत्॥ भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्॥ ५॥ यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते॥ एवं रंगाः प्रयोक्तव्याः
खे अराँ इव खेदया॥ रंगवर्णं प्रयुंजीरं नो ग्रसेत्पूर्वमक्षरं॥ दीर्घस्वरं प्रयुंजीयात्पश्चान्नासिक्यमाचरेत्॥ हृदये चै
कमात्रस्त्वर्द्धमात्रस्तु मूर्द्धनि॥ नासिकायां तथार्द्धं च रंगस्यैवं द्विमात्रता॥ हृदयादुत्करे तिष्ठन्कांस्येन समनुस्मरन्॥
मार्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनं॥ मध्ये तु कंपयेत्कंपमुभौ पार्श्वौ समो भवेत्॥ सरंगं कंपयेत्कंपं रथीवेति
निदर्शनं॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः॥ सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते॥ ६॥ गीती शीघ्री शिरः

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः॥ स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः॥ चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः॥ शिखी रौ
ति त्रिमात्रं तु नकुलस्त्वर्धमात्रकं॥ कुतीर्थादागतं दग्धमपवर्णं च भक्षितं॥ न तस्य पाठे मोक्षोस्ति पापाहेरिव किल्बिषात्॥ सुतीर्थादाग
तं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितं॥ सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते॥ मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह
॥ स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधात्॥ अवक्षरं हनायुष्यं विस्वरं व्याधिपीडितं॥ अक्षता शस्त्ररूपेण व
ज्रं पतति मस्तके॥ हस्तहीनं तु योधीते स्वरवर्णविवर्जितं॥ ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥ हस्तेन वेदं योधीते
स्वरवर्णार्थसंयुतं॥ ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते॥ १०॥ शंकरः शांकरीं प्रादाद्दाक्षीपुत्राय धीमते॥ वाङ्मयेभ्यः
समाहृत्य देवीं वाचमिति स्थितिः॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात्॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः॥ तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः॥ अज्ञानांधस्य लोकस्य ज्ञानांज
न शलाकया॥ चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥ त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः॥ स
भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीति दिवीति॥ २१॥ ॥ इति शिक्षा समाप्ता॥ ॥ श्रीराम॥
अथ ज्योतिषं॥ ॐ नमः॥ पंचसंवत्सरमयं युगाध्यक्षं प्रजापतिं॥ दिनर्त्त्वयनमासांगं प्रणम्य शिरसा शुचिः॥ प्रणम्य शिरसा
कालमभिवाद्य सरस्वतीं॥ कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः॥ ज्योतिषामयनं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः॥ विप्राणां

संमतं लोके यज्ञकालार्थसिद्धये ॥ निरेकं द्वादशार्धाब्दं द्विगुणं गतसंज्ञितं ॥ षष्ट्याप्तं पञ्चयुक्तं द्वाभ्यां पर्वणां राशिरुच्यते ॥ [illegible] स्वरा
र्धमेकेसोमार्कौ यदा साकं सवासवौ ॥ स्यात्तदादियुगं माघस्तपः शुक्लो दिनं त्वजः ॥ २ ॥ प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुद
क् ॥ सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा ॥ घर्मवृद्धिरपां प्रस्थः क्षपा ह्रास उदग्गतौ ॥ दक्षिणे तौ विपर्यस्तौ षण्मु
हूर्त्ययनेन तु ॥ द्विगुणं सप्तमं चाहुरयनाद्यं त्रयोदश ॥ चतुर्थं दशमं चैव द्वियुग्माद्यं बहुलेऽप्यृतौ ॥ वसुस्त्वष्टा भवोऽजश्च
मित्रः सर्पाश्विनौ जलं ॥ धाता कश्चा[illegible]नाद्याश्चार्धपंच[illegible]न भस्त्वृतुः ॥ भांशाः स्युरष्टकाः कार्याः पक्षा द्वादशकोद्धताः ॥ ए
न: कादशगुणः स्याच्छुक्लेऽर्धं चैन्दवा यदि ॥ २ ॥ कार्या भांशाष्टकास्थाने कला एकान्नविंशतिः ॥ ऊनस्थाने द्विसप्तती रुद्ध्येपेहून्
स्संमिताः ॥ त्र्यहं शीभर्तोषोदिवसांशभागश्चतुर्दशस्याप्युपनीतचिन्त्वं ॥ भाद्यैधिके चाधिगते परे स्वेद्वा वृत्तमेकं न वके रवेद्यं ॥
पक्षात्पंचदशाद्वोर्ध्वं तद्भुक्तमिति निर्दिशेत् ॥ नवभिस्तूद्धतो शस्याह्नांशाद्याधिके न तु ॥ जोद्रा गः खे[illegible]हा रोषा वि[illegible]षण्यः सु
स्त माघाण ॥ रेमृघा स्वा पोऽज[illegible] बाहर्जे घाइत्यृक्षा लिंगैः ॥ जौ द्रा घः शेः सममंविघात्स्वर्धा द्वैपार्वस्स्तरे ॥ भा[illegible]दानां शा[illegible]तुर्दशी स्त
काष्ठानां देविना कला ॥ २ ॥ कलादश च विंशा स्याद्विमुहूर्तेस्तु नाडिके ॥ द्वित्रिंशत्तत्कलानां तु षट्शती त्र्यधिकं भवेत् ॥
नाडिके द्वे मुहूर्तस्तु पंचाशत्पलमाषकं ॥ माषकात्कुंभको द्रोणः कुटपैर्वर्धते त्रिभिः ॥ ससस्तकुंभमुक्तस्यो नः सूर्याद्यो
निंत्रयोदश ॥ नवमा[illegible]म्नि चपं चाङ्कः का ष्ठा पंचाक्षरा स्मृताः ॥

श्रविष्ठाभ्यां गुणाभ्यस्तान् प्राग्विलग्नान् विनिर्दिशेत्॥ सौर्यान्मासान् षडभ्यस्तान् विद्याच्चान्द्रमसानृतून्॥ अतीतपर्वभागेभ्यः शोधयेद्द्विगु
णां तिथिं॥ तेषु मंडलभागेषु तिथिनिष्ठां गतो रविः॥४॥ याः पर्वभादानकलास्तासु सप्तगुणां तिथिं॥ प्रक्षिपेत्कलासमूहस्तु विद्याद्
स्या० २ दानकीः कलाः॥ यदुत्तरस्यायनतोयनं स्याच्छेषं तु यद्दक्षिणतोयनं स्यात्॥ तदेव षष्ट्या द्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणं॥ त
दर्धं दिनभागानां सदा पर्वणि पर्वणि॥ ऋतुशेषं तु तद्विद्यात्संख्याय सह पर्वणां॥ इत्युपायसमुद्देशो भूयोप्यन्नं प्रकल्पयेत्॥
ल ज्ञेयराशिं गताभ्यस्तान् विभजेज्ज्ञानराशिषु॥ अग्निः प्रजापतिः सोमो रुद्रोदितिर्बृहस्पतिः॥ सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च॥
५॥ सविता त्वष्टाथ वायुश्चेंद्राग्नी मित्र एव च॥ इंद्रो निर्ऋतिरापो विश्वेदेवास्तथैव च॥ विष्णुर्वसवो वरुणोऽज एकपात्तथैव च॥ अ
हिर्बुध्न्यस्तथा पूषाऽश्विनौ यम एव च॥ नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि॥ यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतं॥ इत्येत
न्मासवर्षाणां मुहूर्तोदयपर्वणां॥ दिनर्त्वयनमासांगं व्याख्यातं लगधोब्रवीत्॥ सोमसूर्यस्त्रिचरितो लोकान् लोके च संमितं॥
सोमसूर्यस्त्रिचरितो विद्वान्वेदविदश्नुते॥६॥ विषुवं तद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणं॥ यल्लब्धं तानि पर्वाणि ततोर्ध्वं सा तिथिर्भ
वेत्॥ माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः॥ युगस्य पंचवर्षाणि कालज्ञानं प्रचक्षते॥ तृतीयां नवमीं चैव पौर्णमासीं त्रयोदशीं
॥ षष्ठीं च विषुवान् प्रोक्तो द्वादश्यां च समं भवेत्॥ चतुर्दशीमुपवसथस्तथा भवेद्यथोदितो दिनमुपैति चंद्रमाः॥ माघशुक्लाह्निको
युंक्ते श्रविष्ठायां च वार्षिकी॥ यथा शिखा मयूराणां नागानां मणयो यथा॥ तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्धनि स्थितं॥ वेदा हि
यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः॥ तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्यो ज्योतिषं वेद

सवेदयज्ञानिति ॥ ८ ॥ ॥ पंच संवत्सरमयं प्रपद्येत कार्याः क ख्यादष्टा चयाः सर्व सविता विषुवं सप्त ॥ ॥ इति ज्योतिषं समाप्तं ॥ ॥
ॐ मयरसतजभन लग संमितं भ्रमति वाङ्मयं जगति यस्य ॥ स जयति पिंगलनागः शिवप्रसादाद्विशुद्धमतिः ॥ १ ॥ त्रिगुरुं विद्धि मकारं लघ्वा
दिसमन्वितं यकाराख्यं ॥ लघुमध्यमं तु रेफं सकारमंते गुरु निबद्धं ॥ लघ्वंत्यं हितकारं जकारमुभयोर्लघुं विजानीयात् ॥ आदिगुरुं च
भकारं नकारमिह पैंगले त्रिलघुं ॥ दीर्घं संयोगपरं तथा स्वरव्यंजनांतमप्लुतं ॥ सानुस्वारं च गुरुं क्वचिदवसानेपि लघ्वंत्यं ॥ आ
दिमध्यावसानेषु यरता यांति लाघवं ॥ भजसा गौरवं यांति मनौ तु गुरुलाघवं ॥ त्रिविरामं दशवर्णषण्मात्रमुवाच पिंगलः सूत्रं ॥ छंदो
वर्गपदार्थप्रत्ययहेतोश्च शास्त्रादौ ॥ १ ॥ धीश्रीस्त्रीम् । वारासाय् । कागुहार् । वसुधास्त्र । सातेक्वत् । कदासजः । किंवदभ्र । नहसन्
गल्लागंते । ग्रादि परः । हे । लौ सः । ग्लौ । अष्टौ वसव इति ॥ २ ॥ छंदः । गायत्री । दैव्येकं । आसुरी पंचदश । प्राजापत्याष्टौ । यजुषां षट्
साम्नां द्विः । ऋचां त्रिः । द्वौ द्वौ साम्नां वर्धेत । त्रींस्त्रीन् ऋचां । चतुरश्चतुरः प्राजापत्यायाः । एकैकं शेषे । जह्यादासुरी । तान्युष्णिगनुष्टु
प् बृहती पंक्ति त्रिष्टुब्जगत्यः । तिस्रस्तिस्रः समनाम्न्य एकैका ब्राह्म्यः । प्राग्यजुषामार्ष्यं इति ॥ ३ ॥ पादः । इयादिपूरणः । गायत्र्या वस
वः । जगत्या आदित्याः । विराजो दिशः । त्रिष्टुभो रुद्राः । एकद्वित्रिचतुष्पादुक्तपादं । आद्यं चतुष्पादृतुभिः । क्वचित्त्रिपादृषिः । सापाद
निचृत् । षट्कसप्तकयोर्मध्ये ष्टावतिपाद्निचृत् । द्वौ नवकौ षट्कश्च नागी । विपरीता वाराही । षट्कसप्तकाष्टकैर्वर्धमाना ॥ ॥

स

द२ ५

विपरीता[illegible]। तृतीयं द्वितीया जागतस्य[illegible]भ्यां। त्रिपात्त्रैष्टुभैः[illegible]। [illegible] चेदं [illegible]ः पुर[illegible]
॥ ४ ॥ पर[illegible]। चतुष्पाद् दृषिभिः। अनुष्टुप् गायत्रैः[illegible]। [illegible]ं च। मध्ये[illegible] च। [illegible] जगतस्य पथ्या[illegible]
पथ्या पूर्व[illegible]तृतीयः। न्यंकुसारिणी द्वितीया। स्कंधोग्रीवी[illegible]। [illegible]। उरोबृहती[illegible]। [illegible] बृहत्यंते। पुरस्ताद् बृहती पु
रः। क[illegible]चत्वारः। वैराजो गायत्रौ च। त्रिभिर्जागतैः[illegible]। सतो बृहती। [illegible]। पंक्ति[illegible] गायत्रौ जागतौ च। पू
र्वौ चेद् अयुजौ सतःपंक्तिः। विपरीतौ च। आस्तारपंक्तिः परतः॥ ५ ॥ प्रस्तारपंक्तिः पुरतः। विष्टारपंक्तिरंतः। संस्तारपंक्तिर्ब
हिः। अक्षरपंक्तिः पंचकाश्चत्वारः। द्वावल्पशः। पदपंक्तिः पंच। चतुष्क षट्कौ त्रयश्च। पथ्या पंच[illegible]गायत्रैः[illegible]। एके
न त्रिष्टुब्ज्योतिष्मती तथा जगती। पुरस्ताज्ज्योतिः प्रथमेन। मध्येज्योतिर्मध्यमेन। उपरिष्टाज्ज्योतिरंत्येन। एकस्मिन्पंचके छं
दः शंकुमती। षट्के ककुद्मती। त्रिपादनिष्ठमध्या पिपीलिकमध्या। विपरीता यवमध्या। ऊनाधिकेनैकेन निचृद्भुरिजौ। द्वाभ्यां
विराट्स्वराजौ। आदितः संदिग्धे॥ ६ ॥ देवतादितश्च। अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविंद्रो विश्वे देवा देवताः।
स्वराः षड्ज ऋषभगांधारमध्यमपंचमधैवतनिषादाः। सितसारंगपिशंगकृष्णनीललोहितगौरा वर्णाः। [illegible]
काश्यप गौतमांगिरस भार्गव कौशिक वासिष्ठानि गोत्राणि। श्यामान्यत्रिच्छंदांसि रोचनाभाः[illegible]

पतिप

तर

कामतो वर्णा इति ॥ ७ ॥ चतुःशतमुत्कृतिः । चतुरश्चतुरस्त्यजेदुत्कृतेः । तान्यभिसंख्याभ्येभ्यः कृतिः [illegible] स्याचोपसर्गवर्जि
तः । धृत्यष्टिशक्करीजगत्यः । पृथक्पृथक् पूर्वत एतान्येवेषां । द्वितीयं द्वितीयमतितः ॥ अतो लौ[illegible]कं आ त्रेषु भाद्य २
यदार्षं । पादश्चतुर्भागः ॥ यथा वृत्तसमाप्तिर्वा । लः समुद्रा गणाः । गोन्तं मध्यादिभ्यश्च ॥ स्वरार्धं चार्यार्धं । [illegible]
ज्ञ्लौ वा । न्लौ चेत्पदं द्वितीयादि । सप्तमः प्रथमादि ॥ अन्त्ये पञ्चमः ॥ ८ ॥ षष्ठश्च ल । त्रिषु गणेषु पादः पथ्या [illegible] ॥
न्या ॥ विपुलाश्च चपला द्वितीय [illegible] चतुर्थौ गुरुमध्ये जो । पूर्वे मुखपूर्वा । जघनपूर्वेतरत्र । उभयोर्महाचपला । आद्यार्धसमा
गीतिः । अन्त्येनोपगीतिः । उत्क्रमेणोद्गीतिः । अर्धे वसुगण आर्यागीतिः । वैतालीयं द्विः स्वरा अयुक्पादे युग्वसवोन्ते लगौ । गौपच्छन्दसि
कं । आपातलिका भगौ ग् । शेषे परेण युङ्न साकं । षट्चाभिश्रायुजि । पंचमेन पूर्वः साकं प्राच्यवृत्तिः ॥ अयुक्तृतीयेनोदीच्यवृ ५
त्तिः । आभ्यां युगपत्प्रवृत्तकं । अयुक् चारुहासिनी ॥ ९ ॥ युगपरान्तिका । गन्ता द्विर्वसवो मात्रासमकं नवमः । द्वादशश्च वा
नवासिकं । विश्लोकः पंचमाष्टमौ । चित्रा नवमश्च । परयुक्तेनोपचित्रा । एभिः पादाकुलकं । गीत्यार्या लः ॥ शिखा विप
र्यस्तार्धा । लः पूर्वश्चेज्ज्योतिः । गश्चेत्सौम्या । चूलिके कोनत्रिंशदेकत्रिंशदन्तेगः ॥ सामान्ये न समा लाङ्गल इति ॥ १० ॥ इतः स
ममर्धसमं [illegible] मैच । समन्ताच्च वृत्तः । कृतमर्धसमं विष[illegible] तिसमानी । [illegible] चमाणी ॥ [illegible]

पादस्यानुष्टुब्वक्त्रे। न प्रथमात्स्नौ। द्वितीयतृतीययो रश्च। वान्यत्॥ युजः॥ पथ्यायुजो ज्। विपरीतैकीयं। चपलायुजो न्।
विपुलायुग्लः सप्तमः। सर्वत्र सैतवस्य। भ्रौं नौ च। प्रतिपादं चतुर्वृध्या पदं चतुरूर्ध्वं॥ गाथा॥ आपीडः॥ ११ ॥ गौ वा दौ चेत् प्रत्यापी
डः। प्रत्यापीडो गावादौ च। प्रथमस्य विपर्यासे मंजरी लवली अमृतधाराः॥ उद्गता मेकतः स्जौ स्लौ न्सौ ज्गौ भ्नौ ज्लौ ग् स्नौ स्जौ ग्
॥ तृतीयस्य सौरभकं नौ भ्गौ। ललितं नौ सौ। उपस्थितप्रचुपितं पृथगाद्यम्सौ ज् भौ गौ स्नौ ज्रौ न्नौ स्नौ नौ ज्यौ। वर्धमानं तृती
यं नौ स्नौ न्सौ। शुद्धविराडृषभं तज्राः। अर्धे। उपचित्रकम् सौ स्लौ ग् भौ भ्गौ ग्। द्रुतमध्या भौ भ्गौ ग् न्जौ ज्यौ। वेगवती सौ सौ
भौ भ्गौ ग्। भद्रविराट् त्जौ र्गौ म्सौ ज्गौ ग्। केतुमती स्जौ स्गौ भ्रौ न्गौ ग्। आख्यानकी तौ ज्गौ ग् ज्तौ ज्गौ ग्। विपरीताख्यानकी ज्तौ
ज्गौ ग् तौ ज्गौ ग्। हरिणप्लुता सौ स्लौ ग् भ्रौ भ्रौ। अपरवक्त्रं नौ र्लौ ग् न्जौ ज्रौ। पुष्पिताग्रा नौ यौ न्जौ ज्रौ ग्॥ १२॥ यवमती जौ जौ
ज्रौ ज्रौ ग्। शिखैकान त्रिंशदेकत्रिंशदंते ग्। खंजा महत्ययुजीति॥ १३ ॥ यतिर्विच्छेदः। तनुमध्या त्यौ। कुमारललिता ज्सौ
ग्। माणवकाक्रीडितकं भ्तौ लगौ। चित्रपदा भौ गौ। विद्युन्माला मौ गौ। भुजगशिशुसृता नौ म्। हलमुखी र्नौ स्। शुद्धविरा
ण्म सौ ज्गौ। पणवो म्नौ य्गौ। रुक्मवती भ्मौ स्गौ। मत्ता म्भौ स्गौ। उपस्थिता त्जौ ज्गौ। एकरूपं सौ
ज्गौ। इंद्रवज्रा तौ ज्गौ ग्। उपेंद्रवज्रा ज्तौ ज्गौ ग्। वाद्यंताबुपजातयः। दोधकं भ्भौ

भौगौ। शालिनी म्तौ तगौ गो रसमुद्रऋषयः॥ १४॥ वातोर्मी म्भौ तौ गौ ग् च। भ्रमरविलसितम् भौ न्लौ ग। रथोद्धता नौ लौ गौ। स्वा
गता नौ भौ गौ। हंसी नौ नौ सौ गौ। श्येनी जौ लौ गौ। जगती। वंशस्था ज्तौ ज्रौ। इंद्रवंशा तौ ज्रौ॥ द्रुतविलंबितं न्भौ भ्रौ। तोटकं सः॥
पुटो नौ म्यौ वसुसमुद्राः। जलोद्धतगति ज्सौ ज्सौ सतवः। भुजंगप्रयातं यः। स्रग्विणी रः। प्रमिताक्षरा स्जौ सौ। वैश्व
देवी मौ यौ विंद्रियऋषयः। नवमालिनी न्जौ भ्यौ विति॥ १५॥ प्रहर्षिणी म्नौ ज्रौ गस्त्रिकदशकौ। रुचिरा ज्भौ स्जौ ग्सु
द्रनवकौ। मत्तमयूरं म्तौ य्सौ गः। असंबाधा म्तौ न्सौ गाविंद्रियनवकौ। अपराजिता नौ सौ ल्गौ स्वरऋषयः। प्रहरणक
लिता नौ भ्नौ ल्गौ च। वसंततिलका त्भौ ज्रौ गौ। सिंहोन्नता काश्यपस्य। उद्धर्षिणी सैतवस्य। चंद्रावर्त्ता नौ नौ सः। माल
श्वेत ऋतुनवकौ चेत्। मणिगुणनिकरो वसुऋषयः। मालिनी नौ म्यौ य् च। ऋषभगजविलसितं भ्रौ नौ न्गौ स्वरनवकौ। हरिणी
न्सौ म्रौ स्लौ गः रससमुद्रऋषयः। पृथ्वी ज्सौ ज्सौ य्लौ गः वसुनवकौ। वंशपत्रपतितं भ्रौ न्भौ न्लौ गः दिगृषयः। मंदा ६
क्रांता म्भौ न्तौ त्गौ गः समुद्रर्तुस्वराः। शिखरिणी य्मौ न्सौ भ्लौ गः रुद्रः। कुसुमितलतावेल्लिता म्तौ न्यौ याविंद्रियर्तु
स्वराः॥ १६॥ शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्याः। सुवदना म्रौ भ्नौ यौ भ्लौ गः स्वरऋषिरसाः। स्त्रियः तं
[illegible] अथ दण्डकाः। मंडूक इति। [illegible] लोयुडादित्याः
[illegible] नौ यो यः [illegible] दंडकाः। मंडूकं त्रौ नौ न्त्रौ न्[illegible]

मत्ताक्रीडा मौ त्नौ नौ [illegible] सुपंचदशकौ। तन्वी भ्तौ न्सौ भौ न्यौ द्विरादित्याः। क्रौंचपदा भ्मौ स्भौ [illegible] नौ [illegible] [illegible]षयः। भुजंगविजृंभितं मौ त्नौ नौ र्सौ ल्गौ वसुरुद्रऋषयः। अप [illegible] वाहः [illegible] म्नौ नौ नौ [illegible] [illegible] इत्युक्तो। दंडको नौ रः। प्रथमश्चंडवृष्टिप्रयातः। अन्यत्र रातमांडव्य [illegible] शेषः प्रचित इति॥ ७ ॥ अत्रासिद्धं गाथा। द्विकौ ग्लौ। मिश्रौ चाप [illegible] लानि श्राः। वसवस्त्रिकाः। लर्धे। सैकेगू। प्रतिलोमगुणं द्विर्लघं। ततोंके [illegible]। द्विरर्द्धे। रूपेशून्यं। द्विः शून्ये। तावदर्धे तद्गुणितं। द्विर्द्विनं। तदंतानां। एकोनेद्धा। परेपूर्णं परेपूर्णमिति॥ ८ ॥ इति छंदः समाप्तः॥ ॥राम॥ ॥मपद्वादशधीः पंचदशछंदःषोडशपादो विंशतिः परोष्णिग्विंशतिः प्रस्तारपंक्तिर्विंशतिर्देवनादितो ष्टौ चतुःशतं विंशतिः षष्ठो विंशतिर्युगपरांतिका त्रयोदशवृत्तं विंशति गावादौ चैविंशतिर्यवमती त्रीयिपि [illegible] विंशतिर्विंशतिर्वीतोमध्यमष्टादश प्रहर्षिणी विंशतिः शार्दूलविक्रीडितं पंचदशा त्रासिद्धं सप्तदशाष्टादशा॥ १८ ॥ ॥राम॥ ॥श्री॥ ॥राम॥ ॥
श्रीगणेशाय नमः॥ ॐ॥ गौः। ग्मा। ज्मा। क्ष्मा। क्षा। क्षमा। क्षोणी। क्षितिः। अवनिः। उर्वी। पृथ्वी। मही। रिपः। अदितिः। इला। निर्ऋतिः। भूः। भूमिः। पूषा। गातुः। गोत्रेत्येकविंशतिः पृथिवीनामधेयानि॥ १॥ हेम। चंद्रं। रुक्मं। अयः। हिरण्यं। पेशः। कृशनं। लोहं। कनकं। कांचनं। भर्म। अमृतं। मरुत्। दत्रं। जातरूपमिति पंचदश हिरण्यनामानि॥ २ ॥ अंबरं। वियत्। व्योम। बर्हिः॥

धन्वं। अंतरिक्षं। आकाशं। आपः। पृथिवी। भूः। स्वयंभूः। अध्वा। पुष्करं। सगरं। समुद्र। अध्वरमिति षोळशांतरिक्षना
मानि॥ ३॥ स्वः। पृश्निः। नाकः। गौः। विष्टप्। नभ इति षट्साधारणानि॥ ४॥ खेदयः। किरणाः। गावः। रश्मयः। अभी
शवः। दीधितयः॥ गभस्तयः। वनं। उस्राः। वसवः। मरीचिपाः। मयूखाः। सप्तऋषयः। साध्याः। सुपर्णइति पंचदशरश्मिनामानि
॥ ५॥ आताः। आशाः। उपराः। आष्टाः। काष्ठाः। व्योम। ककुभः। हरीतइत्यष्टौदिंग्नामानि॥ ६॥ श्यावी। क्षपा। शर्वरी। अक्तुः। ऊर्म्या।
रम्या। यम्या। नम्या। दोषा। नक्ता। तमः। रजः। असिक्नी। पयस्वती। तमस्वती। घृताची। [illegible] णा। मोकी। शोकी। ऊधः। पयः। हिमा।
वस्वेति त्रयोविंशती रात्रिनामानि॥ [illegible]॥ विभावरी। सूनरी। भास्वती। ओदती। चित्रामघा। अर्जुनी। वाजिनी। वाजिनीवती। सुम्ना
वरी। अहना। द्योतना। श्वेत्या। अरुषी। सूनृता। सूनृतावती। सूनृतावरीति षोळशोषानामानि॥ ८॥ वस्तोः। द्युः। भानुः। वासरं।
स्वसराणि। घ्रंसः। घर्मः। घृणिः। दिनं। दिवा। दिवेदिवे। द्यविद्यवीति द्वादशाहर्नामानि॥ ९॥ अद्रिः। ग्रावा। गोत्रः। वलः। अश्नः। पुरु
भोजाः। [illegible]। शानः। अश्मा। पर्वतः। गिरिः। व्रजः। चरुः। वराहः। शंबरः। रौहिणः। रैवतः। [illegible]लिगः। उपरः। उपलः। चमसः। अ
हिः। अभ्रं। बलाहकः। मेघः। दृतिः। ओदनं। वृषंधिः। वृत्रः। असुरः। कोशः [illegible] नामानि॥ १०॥ श्लोकः। धा
[illegible]॥ गौः। गौरी। गांधर्वी। गभीरा। गंभीरा। मंद्रा। मंद्राजनी। [illegible] वाशी। वाणी। [illegible] भारती। [illegible]। नादि।

मेखिः।मेना।सूर्या।सरस्वती।निवित्।स्वाहा।वग्नुः।उपब्दिः।मायुः।[illegible]।[illegible]।स्वरं।समुद्र[illegible]स्वनः।[illegible]।होत्रा।गीः।
गाथा।गणः।मेना।ग्नाः।विपा।नना।कशा।धिषणा।नौः।अक्षरं।[illegible]।अदितिः।शची।[illegible]।धेनुः।वल्गुः।गल्दा।स
रः।सुपर्णी।बेकुरेति सप्तपंचाशद्वाङ्नामानि॥ ११॥ अर्णः।क्षोदः।क्षद्म।नभः।अं[illegible]।कबंधं।सलिलं।वाः।वनं।घृतं।मधु।
पुरीषं।पिप्पलं।क्षीरं।विषं।रेतः।कशः।जन्म।बृबूकं।बुसं।तुग्र्या।बर्बुरं।सुक्षेम।धरुणं।सुरा।अररिंदानि।ध्वस्मन्वत्।
जामिः।आयुधानि।क्षपः।अहिः।अक्षरं।स्रोतः।तृप्तिः।रसः।उदकं।पयः।सरः।भेषजं।सहः।शवः।यहः।ओजः।सुखं।क्ष
त्रं।आवयाः।शुभं।यादः।भूतं।भुवनं।भविष्यत्।आपः।महत्।व्योम।यशः।महः।सर्णीकं।स्वृतीकं।सतीनं।गहनं।गभी
रं।गंभरं।ईम्।अन्नं।हविः।सद्म।सदनं।योनिः।ऋतस्य योनिः।सत्यं।नीरं।रयिः।सत्।पूर्णं।सर्वं।अक्षितं।बर्हिः।नाम।सर्पिः।
अपः।पवित्रं।अमृतं।इंदुः।हेम।स्वः।सर्गाः।शंबरं।अभ्वं।वपुः।अंबु।तोयं।तूयं।कृपीटं।शुक्रं।तेजः।स्वधा।वारि।जलं।ज
लाषं।इदमित्येकशतमुदकनामानि॥ १२॥ अवनयः।यव्याः।खाः।सीराः।स्रोत्याः।एन्यः।धुनयः।रुजानाः।वक्षणाः।
खादोअर्णाः।रोधचक्राः।हरितः।सरितः।अग्रुवः।नभन्वाः।वध्वः।हिरण्यवर्णाः।रोहितः।सस्रुतः।अर्णाः।सिंधवः।
कुल्याः।वर्यः।उर्व्यः।इरावत्यः।पार्वत्यः।स्रवंत्यः।ऊर्जस्वत्यः।पयस्वत्यः।तरस्वत्यः।सरस्वत्यः।हरस्वत्यः।रोधस्वत्यः।

५ ऋतं

४ अक्षरं।

नि० ८

भास्वता:। अङ्गिराः। मातरः। नद्य इति सप्तत्रिंशन्नदीनामानि॥ १३ ॥ अत्यः। हयः। अर्वा। वाजी। सप्तिः। वह्निः। दधिक्राः। दधि
क्रावा। एतग्वः। एतशः। पैद्वः। दौर्गहः। औच्चैःश्रवसः। तार्क्ष्यः। आशुः। ब्रध्नः। अरुषः। मांश्चत्वः। अव्यथयः। श्येनासः। सुप
र्णाः। पतंगाः। नरः। ह्वार्याणां। हंसासः। अश्वा इति षड्विंशतिरश्वनामानि॥ १४ ॥ हरी इंद्रस्य। रोहितोऽग्नेः। हरित आदित्यस्य
। रासभावश्विनोः। अजाः पूष्णः। पृषत्यो मरुतां। अरुण्यो गावउषसां। श्यावाः सवितुः। विश्वरूपा बृहस्पतेः। नियुतो
वायोरिति दशादिष्टोपयोजनानि॥ १५ ॥ भ्राजते। भ्राशते। भ्राश्यते। दीदयति। शोचति। मंदते। भंदते। रोचते। ज्योतते।
द्योतते। द्युमदित्येकादश ज्वलतिकर्माणः॥ १६ ॥ जमत्। कल्मलीकिनं। जंजणाभवन्। मल्मलाभवन्। अर्चिः। शो
चिः। तपः। तेजः। हरः। हृणिः। श्रृंगाणि। श्रृंगाणीत्येकादश ज्वलतो नामधेयानि नामधेयानि॥ १७ ॥ गौः। ईमांबरं। स्वः
स्वदयः आता श्यावी विभावरी वस्तोरद्रि ... श्लोको कोर्णा वनयोत्यो हरी इंद्रस्य भ्राजते जमदिति सप्तदश॥ ॥ राम ॥
इति निघंटौ प्रथमोऽध्यायः॥ ॥ अश्नः। अपः। अप्नः। दंसः। वेषः। वेपः। विष्ट्वी। व्रतं। कर्वरं। कर्माः। शक्म। क्रतुः। करणानि। करां
सि। करिक्रत्। करंति। चक्रत्। कर्तुं। कर्तोः। कर्त्तवै। कृत्वी। धीः। शची। शमी। [illegible] बड्डिंशतिः कर्म
नामानि॥ १ ॥ तुक्। तोकं। तनयः। तोक्म। तक्म। शेषः। अप्नः। गयः। [illegible] नपात्। प्रजा। बीजमिति पंचद

शापसनामानि॥२॥मनुष्याः।नरः।धवः।जंतवः।विशः।क्षितयः।कृष्टयः।चर्षणयः।नहुषः।हरयः।मर्याः।मर्ताः।व्राताः।तुर्वशाः।द्रुह्य
वः।आयवः।यदवः।अनवः।पूरवः।जगतः।तस्थुषः।पंचजनाः।विवस्वंतः।पृतनाइतिपंचविंशतिर्मनुष्यनामानि॥३॥आयती।च्यवाना।अ
भीशू।अप्नवाना।विनंगृसो।गभस्ती।करस्नू।बाहू।भुरिजौ।क्षिपस्ती।शक्वरी।भरित्रेइतिद्वादशबाहुनामानि॥४॥अगुवः।अण्व्यः।क्षिपः।
४व ।विशः।शर्याः।रशनाः।धीतयः।अथर्यः।विपः।कक्ष्याः।अवनयः।हरितः।स्वसारः।जामयः।सनाभयः।योक्त्राणि।योजनानि।धुरः।शाखाः।
अभीशवः।दीधीतय इतिद्वाविंशतिरंगुलिनामानि॥५॥वश्मि।उश्मसि।वेति।विनति।वसति।वांछति।वष्टि।वनोति।जु
षते।हर्यति।आचके।उशिक्।मन्यते।छंत्सत्।चाकनत्।चकमानः।कनति।कानिषदित्यष्टादशकांतिकर्माणः॥६॥अंधः।वाजः।
पयः।प्रयः।पृक्षः।पितुः।सुतं।सिनं।अवः।क्षु।धासि।इरा।इला।इषं।ऊर्क्।रसः।स्वधा।अर्कः।क्षद्म।नेमः।ससं।नमः।आयुः।सू वयः।
नृता।ब्रह्म।वर्चः।कीलालं।यशमित्यष्टाविंशतिरन्ननामानि॥७॥आवयति।भर्वति।बभस्ति।वेति।वेवेष्टि।अविष्यन्।बप्सति।भस
थः।बब्धाम्।ह्वरतीतिदशात्तिकर्माणः॥८॥ओजः।पाजः।शवः।तवः।तरः।त्वक्षः।शर्द्धः।बाधः।नृम्णं।तविषी।शुष्मं।शुष्मं।दक्षः।वी
ळु।च्यौत्नं।शूषं।सहः।यहः।वधः।वर्गः।वृजिनं।विहः।मज्मना।पौंस्यानि।धर्णसिः।द्रविणं।स्पंद्रासः।शंबरमित्यष्टाविंशतिर्बलनामा
नि॥९॥मघं।रेक्णः।रिक्थं।वेदः।वरिवः।श्वात्रं।रत्नं।रयिः।क्षत्रं।भगः।मीढुं।गयः।द्युम्नं।इंद्रियं।वसु।रायः।राधः।भोजनं।तना।
नृम्णं।बंधुः।मेधा।यशः।ब्रह्म।द्रविणं।श्रवः।वृत्रं।ऋतमित्यष्टाविंशतिर्धननामानि॥१०॥अघ्न्या।उस्रा।उस्रिया।अही।

नृम्णं।२

स्यति। ईर्मे। ८   ति। इयक्षति ५   सूनति। सरति। ५   रिणाति। इयर्ति। ६

निघं० ९

महीः। अदितिः। इळा। जगती। शक्वरीति नव गोनामानि॥ ११ ॥ रेळ्हते। हेळते। भ्रामते। हृणीयते। भ्रीणाति। भ्रेषति। दोधति। वनुष्य
ति। कंपते। भोजत इति दश क्रुध्यतिकर्मणः॥ १२ ॥ हेळः। हरः। हृणिः। त्यजः। भ्रामः। एहः। वरः। तपुषी। जूर्णिः। मन्युः। व्यथिरिति
कादश क्रोधनामानि॥ १३ ॥ वर्त्तते। अयते। लोटते। लोठते। स्यंदते। कसति। सर्पति। स्यमति। स्रंसति। [illegible] अवति। श्चोतति।
ध्वंसति। वेनति। मार्ष्टि। भुरण्यति। शवति। कालयति। पेलयति। कंटति। पिस्यति। विस्यति। मिस्यति। प्रवते। प्लवते। च्यवते। कवते।
गवते। नवते। क्षोदति। सक्षति। नक्षति। माक्षति। मिमेक्षि। सश्चति। तुरीयति। [illegible] अतति। [illegible] सश्चति। [illegible] रंहति। [illegible]॥
त्समति। वृजति। रंजति। [illegible]। मियक्षति। सिनति। मिनोति। सणवति। सणोति। [illegible]। सिसर्त्ति। वेविष्टि। योशिष्टि। रिणाति। रीय
ते। सिसक्ति। इष्यति। [illegible]। युध्यति। धन्वति। अर्षति। आर्यति। रीयते। तकति। चीयते। ईषति। फणति। [illegible]। अर्दति। मर्दति। [illegible]
सिसर्ति। [illegible]। [illegible]। [illegible]। [illegible] ज्रयति। श्वात्रति। गंति। [illegible] गनीगंति। जिगंति। जिगाति। [illegible]। मिनाति। द्रुतिः। द्राति। दुवस्यति।
ति। [illegible] अथर्यति। जेहते। [illegible]। [illegible]। एजति। जवति। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible] पवते।
हंति। सेधति। अगन्। अजगन्। जिगाति। [illegible]। इन्वति। द्रमति। द्रवति। वेति। [illegible]। जगायात्। अयधुरिति द्वाविंशंशत
तं गतिकर्मणः॥ १४॥ नु। मक्षु। द्रवत्। ओषं। जीराः। जूर्णिः। [illegible]। [illegible]। शीभं। [illegible]। तूयं। [illegible]। आजिरं। भुरण्युः॥
[illegible] ले [illegible] नुज्यमानासः। [illegible] वातरंहा। [illegible] शांतिः। शि
[illegible] गतिः॥ गतिः।

वनुष्यति १२
अवत्यौ
१८
१ नुरवाति
नु
= ह्रयति
ई
९
री०

... अंबर। तुर्वणि। अस्तमीके। ... अर्वाके। अंतमानां। ... अपमे ... इत्यंतिक नामानि॥ १६॥ रण। विवाद्। नदनुः। विषादनः। भरे। आक्रंदे। आहवे। आजौ। पृतनाज्ये। अभीके। समीके। ममसत्ये। नेमधिता। संका। स्पर्धिति। समनं। मीळ्हे। पृतनाः। स्पृधः। मृधः। पृत्सु। समत्सु। ... समरणे। समोहे। समिथे। संखे। संगे। संयुगे। संगथे। ... वृत्रतूर्ये। पृक्षे। आणौ। शूरसातौ। वाजसातौ। समनीके। खले। खजे। पौंस्ये। महाधने। वाजे। अज्म। ... संयत। संयत इति षट्चत्वारिंशत् संग्राम नामानि॥ १७॥ इन्वति। ... आक्षाणः। आनट्। आष्ट। आपानः। अशनवत्। अश्नुत। आनशे। अश्नुत इति दश व्याप्तिकर्माणः॥ १८॥ दभ्नोति। श्नथति। ध्वरति। ध्वंसति। वृणक्ति। वृश्चति। कृणाति। कृंतति। श्वसति। ... अर्दयति। मर्दयति। स्नेहयति। यातयति। स्फुरति। ... निवपति। अवतिरति। वियात। आतिरत्। तळित्। आखंडल। तृणाति। ... शृणोति। शम्नाति। ... मिनाति। मिनोति। विनेति। ... निशोशयति। निधमतीति त्रयस्त्रिंशद्वधकर्माणः॥ १९॥ दिद्युत्। नेमिः। हेतिः। नमः। पविः। सृकः। वृकः। वधः। वज्रः। अर्कः। कुत्सः। कुलिशः। तुंजः। तिग्मः। ... धितिः। सायकः। परशुरित्यष्टादश वज्रनामानि॥ २०॥ इरज्यति। पत्यते। क्षियति। राजतीति चत्वार ऐश्वर्यकर्माणः॥ २१॥ राष्ट्री। अर्यः। नियुत्वान्। इनः। इन इति चत्वार ईश्वरनामानि॥ २२॥ अपस्थं इमं नुष्वा आपत्यं तु वो वसम्यं ध आवयत्यो जोमघ मह्यारे लतेहु

युधनौ ... वज्रः

बर्हयति। नेमिः ३ स्वरु

निघं०
१०

त्रिषुकः
दुक्षः
महिषः
अम्बा
नीलं

८ मुहिषः अम्बा कः १२ कः १३

लोवर्तते तुतलित् इन्वति दभ्नोति दिद्युदिरज्यति राष्ट्री द्वाविंशतिः॥ २ ॥इति निघंटौ द्वितीयोध्यायः॥ ॥राम॥ ॥ॐ उरु। तुवि।
पुरु। भूरि। शश्वत्। विश्वं। परीणसा। व्यानशिः। शतं। सहस्रं। सलिलं। कुविदिति द्वादश बहुनामानि॥ १॥ ऋहत्। ह्रस्वः। नि
घृष्वः। मायुकः। प्रतिष्ठा। वृधुं। वम्रकः। दभ्रं। अर्भकः। क्षुल्लकः। अल्पं इत्येकादश ह्रस्वनामानि॥ २॥ महत्। ब्रध्नः। स
ऋहत्। उक्षितः। तवसः। तविषी। महिषः। अभ्वः। ऋभुक्षाः। उक्षाः। विहायाः। यद्वः। ववक्षिथ। विवक्षसे। अंभृणाः।
माहिनः। गभीरः। ककुहः। रभसः। ब्राधन्। विरप्शी। अद्भुतं। बर्हिष्ठः। बर्हिषदिति पंचाविंशतिर्महन्नामानि॥ ३॥ गयः। कृ
दरः। गर्तः। हर्म्यं। अस्तं। पस्त्यं। दुरोणे। नीलं। दुर्याः। स्वसराणि। अमा। दमे। कृत्तिः। योनिः। सद्म। शरणं। वरूथं। छर्दिः। छा
या। शर्म। अजमिति द्वाविंशतिर्गृहनामानि॥ ४॥ इरज्यति। विधेम। सपर्यति। नमस्यति। दुवस्यति। ऋध्नोति। सणढि। सश्चति।
सपति। ... सतीति दश परिचरणकर्माणः॥ ५॥ शिंबाता। शतरा। शातपंता। शिल्मूः। स्यूमक। शेवृधं। मयः। सुम्नं। सुदि
नं। शूषं। शुनं। शं। ... भेषजं। जलाषं। स्योनं। सुम्नं। शेवं। शिवं। शं कमिति विंशतिः सुखनामानि॥ ६॥ निर्णिक्। वव्रिः।
वर्पः। वपुः। अमतिः। अप्सः। रूपं। अमा। पिष्टं। पेशः। ... मरुत्। अर्जुनं। ... रूपमिति ... रूपना
मानि॥ ... मा। अनेमा। अनेद्यः। अनवद्यः। अनभि... उक्थ... प्रशस्य...

... वपुः

ज्ञानबोध अ

मानि॥ ८ ॥ केतुः॥ केतिः॥ चेतः॥ क्रतुः॥ असुः॥ धीः॥ शची॥ माया॥ वयुनं॥ अभिख्येति॥ प्रज्ञानामानि॥ ९ ॥ बट्॥ श्रत्॥ सत्रा॥ अद्धा॥ इत्था॥ ऋतमितिषट् सत्यनामानि॥ १० ॥ चिकयत्॥ चकनत्॥ आचष्टे॥ चष्टे॥ विचष्टे॥ विचर्षणिः॥ विश्वचर्षणिः॥ अवचाकशदिति अष्टौ पश्यतिकर्माणः॥ ११ ॥ हि कं॥ नुकं॥ सुकं॥ आहिकीं॥ आकीं॥ माकिः॥ नकिः॥ नकीं॥ आकृतमिति नवो त्तराणि पदानि सर्वपदसमाम्नानाय॥ १२ ॥ इदमिव॥ इदं यथा॥ अग्निर्नये॥ चतुरश्चिद्ददमानात्॥ ब्राह्मणा व्रतचारिणः॥ वृक्षस्य नु ते पुरुहूत वयाः॥ जार आ भगं॥ मेषो भूतो ऽभियन्नयः॥ तद्रुपः॥ तद्वर्णः॥ तद्वत्॥ तथेति॥ उपमाः॥ १३ ॥ अर्चति॥ गायति॥ रेभति॥ स्तोभति॥ गूर्द्धयति॥ गृणाति॥ जरते॥ ह्वयते॥ नदति॥ पृच्छति॥ रिहति॥ धमति॥ कृपायति॥ कृपण्यति॥ पनस्यति॥ पनायते॥ वल्गूयति॥ मंदते॥ भंदते॥ छंदति॥ छदयते॥ शशमानः॥ रञ्जयति॥ रंजयति॥ शंसति॥ स्तौति॥ यौति॥ रौति॥ नौति॥ भनति॥ पृणयति॥ पणायति॥ सपति॥ पपृक्षाः॥ महयति॥ वाजयति॥ पूजयति॥ मन्यते॥ मदति॥ रसति॥ स्वरति॥ वेनति॥ मन्दयते॥ जल्पति॥ इति चतुश्चत्वारिंशदर्चतिकर्माणः॥ १४ ॥ विप्रः॥ विग्रः॥ गृत्सः॥ धीरः॥ वेनः॥ मेधाः॥ कण्वः॥ ऋभुः॥ नवेदाः॥ कविः॥ मनीषी॥ मंधाता॥ विधाता॥ विपः॥ मनश्चित्॥ विपश्चित्॥ विपन्यवः॥ आकेनिपः॥ उशिजः॥ कीस्तासः॥ अद्धातयः॥ मतयः॥ मतुथाः॥ मेधाविन इति चतुर्विंशति र्मेधाविनामानि॥ १५ ॥ रेभः॥ जरिता॥ कारुः॥ नदः॥ स्तोमुः॥ कीरिः॥ गौः॥ सूरिः॥ नादः॥ छंदः॥ स्तुप्॥ रुद्रः॥ कृपण्युरिति त्रयोदश स्तोतृनामानि॥ १६ ॥ यज्ञः॥ वेनः॥ अध्वरः॥ मेधः॥ विदथः॥ नार्यः॥ सवनं॥ होत्रा॥ इष्टिः॥ देवता॥ मखः॥ विष्णुः॥

(margin: नदति॥ पृच्छति॥ उप॥ गौः॥ २)

वल्गूयते॥ ४ मन्यत ६४ कीरिः॥ २ केनिपः॥ २ नदः॥ २ अध्वरः॥ विदथः॥

वव्रिः। कटुः खातुः ५ अवटः ५ दृग्घि २ सूदः ५ रिरीहि २ रासते सवा वः। २ मिमिक्कि २

निघं०
११

२३ः। प्रजापतिः। धर्म इति पंचदश यज्ञनामानि॥ १७॥ भरताः। कुरवः। वाघनः। हक्तबर्हिषः। यतस्रुचः। मरुतः। [illegible] देवयवः इत्यष्टौ ऋत्विङ्नामानि॥ १८॥ ईमहे। यामि। मन्महे। [illegible]। शग्धि। पृर्धि। [illegible]। मिमीहि। रिरिहि। [illegible] पीपरत्। यंतारः। यंसि। दुष्यति। मदेम हि। मनामहे। मायेन इति सप्तदश याच्चाकर्माणः॥ १९॥ दाति। दाशति। दासति। राति। रासति। पृणक्षि। पृणाति। शिक्षति। तुंजाति। मंहत इति दशदानकर्माणः॥ २०॥ परिस्रव। पवस्व। अभ्यर्ष। आशिष इति चत्वारो ध्येषणाकर्माणः॥ २१॥ स्वपिति। सस्तीति द्वौ स्वपिति कर्माणी॥ २२॥ [illegible] काटुः [illegible] काटः। खातः। अवतः। क्रिविः। सूदः। उत्सः। ऋश्यदात्। कारोतरात्। कुशयः। केवट इति चतुर्दश कूपनामानि॥ २३॥

त्रिपुः
त्रिको

त्रिपुः। तक्वो। रिभ्वा। रिपुः। रिक्वा। रिहायाः। तायुः। तस्करः। वनर्गुः। हुरश्चित्। मुषीवान्। मलिम्लुचः। अघशंसः। वृक इति चतुर्दश स्तेननामानि॥ २४॥ निण्यं। सस्वः। सनुतः। हिरुक्। प्रतीच्यं। अपीच्यमिति षण्णिर्णीतान्तर्हितनामधेयानि॥ २५॥ आके। पराके। पराचैः। आरे। परावत इति पंच दूरनामानि॥ २६॥ प्रत्नं। प्रदिवि। प्रवयाः। सनेमि। पूर्व्यं। अह्नाय इति षट् पुराणनामानि॥ २७॥ नवं। [illegible] नूतनं। नूत्नं। [illegible] इति [illegible]ति षड् नवनामानि॥ २८॥ प्रपित्वे। अभीके। दभ्रं। अर्भकं। तिरः। सतः। त्वः। नेमः। ऋक्षाः। [illegible] क्षुल्लकं इति [illegible] उपजिह्विका। उर्दरं। कृदरं। रंभः। पिनाकं। मेनाग्नाः। शेपः। वैतसः। अया। एना। [illegible] सावते [illegible] जत इति [illegible] त्रि [illegible] माणि जर मानि॥ २९॥ स्वधे। पुरंधी। धिषणे। रोदसी। [illegible]। अभ्वसी। नभसी। [illegible] मही [illegible] गभीरे। गंभीरे। ओण्यौ [illegible] अर्वी। उर्वी। पृथ्वी। बृहती। [illegible] इति [illegible] २५

से। [illegible] २

मधे यानि नामधेयानि ॥ २० ॥ उरु ह महे ॥ यज्ञे स्याति त्रिंशात् ता नि [illegible] ॥ [illegible] ॥ [illegible] ॥ [illegible] ॥
भरताई महेदातिपरिस्रवस्चपितिकूपस्पृनिण्य माके [illegible] नवं [illegible] ॥ [illegible] ॥ टौत ॥ योप्य यः ॥ ॥
ओं३म्। जह्ना। निधा। सिताम [illegible] हनो। दमना:। म्रूष:। इरिण। कुरु तन। [illegible] दूह। ईर्मा। नास:। काय
मानः। लोधं। शीरं। विदृथे। द्रुपदे। तुग्वनि। नंसंते। नसतः। आहनस:। अदक्स्नत्। [illegible] अणः। [illegible] नूपक्ष्या। कुदिते। स्यते।
नूचित्। नूच। दावने। अकूपारस्य। शिशीते। सुतुकः। सुप्रायणा:। अप्रायुव [illegible] खन:। [illegible] कुहुर। ओते:। काणा:। वा
शी। विष्णुणा:। जामि:। पिता। शंयो:। अदिति:। एरिरे। जसुरि। जरते। मंदिने। गो:। गातु:। दंसु [illegible]:। तूताव। चयसे। विष्णुते।
स्य। शी। विष्णुणा। जामि:। पिता। शंयोः। अदिति:। एरिरे। जसुरि। जरते। मंदिने। गोः। गातुः। दंसः। तूताव। चयसे। विष्णुते।
सधक्। अस्या:। अस्येति द्विषष्टि पदानि ॥ १ ॥ सस्निं। वाहिष्ठः। दूतः। वावशानः। वार्य्यो। अंधः। असश्चंती। वनुष्यति। तरु
ष्यती। भंदनाः। आहनः। नदः। सोमो अक्षाः। श्वात्रं। ऊतिः। हासमाने। पड्भिः। ससं। द्विता। व्राः। वराहः। स्वसराणि। शर्य्याः।
अर्कः। पविः। वक्षः। धन्व। सिनं। इत्था। सचा। चित्। आ। द्युम्नं। पवित्रं। तोदः। स्वंचाः। शिपिविष्टः। विष्णुः। आघृणिः॥
पृथुज्रयाः। अथर्यु। काणुका। अध्रिगुः। आंगूषः। आपांतमन्युः। श्मशा। उर्वशी। वयुनं। वाजपस्त्यं। वाजगंध्यं। गध्यं।
गौर्धीता। कौरयाणः। तौरयाणः। अह्रयाणः। हरयाणः। आरितः। व्रंदी। निःषपी। तूर्णाशं। क्षुंपं। निचुंपुणः। पदिं। पादुः।
तिः।

नः। अ२

निघं॰ १२ हृकः। जोषवाकं। कृत्तिः। श्वघ्नी। समस्य। कुटस्य। चर्षणिः। शंबः। केपयः। तूतुमाकृषे। अंसत्रं। काकुदं। बीरिटं। अच्छ। अच्छा।
परि। ईं। सीं। एनां। सृणिरिति चतुर्विंशतिरुत्तरमशीतिः पदानि॥ २॥ आशुशुक्षणिः। आशाभ्यः। काशिः। कुणारुं। अ
लातृणः। सलल्लूकं। कत्पयं। विस्रुहः। वीरुधः। नक्षद्दाभं। अस्कृधोयुः। निशृंभाः। बृबदुक्थं। ऋदूदरः। ऋदूपे। पुलुका
मः। असिन्वती। कपनाः। भाऋजीकः। रुजानाः। जूर्णिः। ओमना। उपलप्रक्षिणी। उपसि। प्रकलविद्। अभ्यर्धयज्वा। ई
क्षे। क्षोणस्य। अस्मे। पाथः। सवीमनि। सप्रथाः। विदथानि। श्रायन्तः। आशीः। अजीगः। अमूराः। शशमानः। देवो देवाच्या
कृपा। विजाः। मालुः। ओमासः। सोमानं। अनवायं। किमीदिने। अमवान्। अमीवा। दुरितं। अप्वा। अमतिः। श्रुष्टी। पुरंधिः। रुश नि॰।
त्। रिशादसः। सुदत्रः। सुविदत्रः। आनुषक्। तुर्वणिः। गिर्वणसे। अस्रत्तैस्त्तै। अम्यक्। याद्दृश्मिन्। जारयायि। अग्रिया।
चनः। पचता। शुरुधः। अमिनः। जज्झतीः। अप्रतिष्कुतः। शाशदानः। सृप्रः। सुशिप्रः। शिप्रे। रंसु। द्विबर्हाः। अक्रः। उराणः॥
स्तियानां। स्तिपाः। जबारु। जरूथं। कुलिशः। तुंजः। बर्हणा। ततनुष्टिं। इलीबिशः। कियेधाः। भृमिः। विष्पितः। तुरीपं। रास्पिनः। सं स्या १२
जसिः। ऋजुनीती। प्रतद्वसू। हिनोत। चोष्कूयमाणः। चोष्कूयते। सुमत्। दिविष्टिषु। दूतः। जिन्वति। अमत्रः। ऋचीषमः। अनर्श
रातिं। अ[illegible]। [illegible]। गल्दया। जल्हवः। बकुरः। बेकनाटान्। अ[illegible]। अभिधेतन। अंहुरः। बतः। वाताप्यं। [illegible]। [illegible]। [illegible]।

न॰ र रिवा॰

[illegible] कूळती। नदः। द्वाराकः। इदयु [illegible] बा। सम [illegible] सि [illegible] शद्वे
तपदानि॥ ६ ॥जेहा स स्निमा त्रुत्रुक्षाणि स्त्रीणि॥ ॥इति नि [illegible] अग्निः। जातवेदाः। वैश्वानर इति
त्रीणिपदानि॥ १ ॥द्रविणोदाः। इध्मः। तनूनपात्। नराशंसः। इळः। बर्हिः। द्वा [illegible] होतारा। तिस्रोदेवीः। त्वष्टा। वन
स्पतिः। स्वाहाकृतयः। इत्या जानु याजा इति चतुर्दशपदानि॥ २॥ अश्वः। शकुनि [illegible] मण्डूकाः [illegible] ग्रावाणः [illegible] नराशंसः। रथः।
दुंदुभिः। इषुधिः। हस्तघ्नः। अभीशवः। धनुः। ज्या। इषुः। अश्वाजनि। उलूखल [illegible] नद्यः। आपः। ओषध
यः। रात्री। अरण्यानि। श्रद्धा। पृथिवी। अप्वा। अग्नायी। उलूखलमुसले। हविर्धाने। द्यावापृथिव्यौ। विपाट्छुतुद्रौ। आर्त्नी।
शुनासीरौ। देवीजोष्ट्री। देवीऊर्जाहुतीइति षट्त्रिंशत्पदानि॥ ३॥ वायुः। वरुणः। रुद्रः। इन्द्रः। पर्जन्यः। बृहस्पतिः। ब्रह्म
णस्पतिः। क्षेत्रस्यपतिः। वास्तोष्पतिः। वाचस्पतिः। अपांनपात्। यमः। मित्रः। कः। सरस्वान्। विश्वकर्मा। तार्क्ष्यः। मन्युः। दधि
क्राः। सविता। त्वष्टा। वातः। अग्निः। वेनः। असुनीतिः। ऋतः। इन्दुः। प्रजापतिः। अहिर्बुध्न्यः। सुपर्णः। पुरूरवा इति द्वात्रिंशत्प
दानि॥ ४ ॥श्येनः। सोमः। चंद्रमाः। मृत्युः। विश्वानरः। धाता। विधाता। मरुतः। रुद्राः। ऋभवः। अंगिरसः। पितरः। अथर्वाणः।
भृगवः। [illegible] आप्त्याः। अदितिः। सरमा। सरस्वती। वाक्। अनुमतिः। राका। सिनीवाली। कुहूः। यमी। उर्वशी। पृथिवी। इंद्राणी॥ ॥

ऋषयः।

अहिः। ३

गौरी। गौः। धेनुः। अघ्न्या। पथ्या। स्वस्तिः। उषाः। इळा। रः दसी इति सप्तत्रिंशत्पदानि॥ ५ ॥ अश्विनौ। उषाः। सूर्या। वृषाकपायी।
। सरण्यूः। त्वष्टा। सविता। भगः। सूर्यः। पूषा। विष्णुः। विश्वानरः। वरुणः। केशी। केशिनः। वृषाकपिः। यमः। अज एकपात्।
पृथिवी। समुद्रः। दध्यङ्। अथर्वा। मनुः। आदित्याः। सप्त ऋषयः। देवाः। विश्वेदेवाः। साध्याः। वसवः। वाजिनः। देवप
त्न्यो देवपत्न्य इत्येकत्रिंशत्पदानि॥ ६ ॥ अग्निर्द्रविणोदा अश्वो वायुः श्येनो श्विनौ॥ षट्॥ ॥ इति घंटे पंचमोध्यायः॥
॥ ॥[illegible]म॥ ॥राम॥ ॥शुभमस्तु॥ ॥श्रीरघुनाथार्पणमस्तु॥ ॥संवत् ७१०॥ गाध तिः २ वार २॥

